This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 62/S/N
गूढसंख्या

SET No. A
स्तबकः

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (247)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of two Invigilators 1. ______________________
(निरीक्षकयोः हस्ताक्षरम्)

2. ______________________

---

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (247)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10**, [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) मनुष्यस्य विशेषः कः यः पशूनां नास्ति ।

(क) सुखं (ख) दुःखं

(ग) क्रोधः (घ) धर्मः

(2) आस्तिकदर्शनानि कति ।

(क) पञ्च (ख) त्रीणि

(ग) नव (घ) षट्

(3) अज्ञानोपहितं चैतन्यमात्मा इति के वदन्ति ।

(क) चार्वाकाः (ख) भाट्टाः

(ग) वेदान्तिनः (घ) वैशेषिकाः

(4) मोक्षकारणसामग्र्यां का गरीयसी ।

(क) विद्या (ख) भक्तिः

(ग) उपासना (घ) जिज्ञासा

(5) सैन्धवशब्दार्थः लवणमिति कस्मिन् प्रकरणे ।

(क) भोजनप्रकरणे (ख) स्नानप्रकरणे

(ग) चिकित्साप्रकरणे (घ) युद्धप्रकरणे

(6) विवेकचूडामणेः कर्ता कः ।

(क) मध्वाचार्यः (ख) रामानुजः

(ग) शङ्कराचार्यः (घ) निम्बार्कः

(7) वैतण्डिकः कः ।

(क) मीमांसकः (ख) चार्वाकः

(ग) पौराणिकः (घ) वैय्याकरणः

(8) चार्वाकमते देहस्योच्छेदः कः ।

(क) मोक्षः (ख) स्वर्गः

(ग) नरकः (घ) बन्धः

(9) सन्तानवादः कस्य मते अस्ति ।

(क) चार्वाकमते (ख) बौद्धमते

(ग) जैनमते (घ) न्यायमते

(10) संशयविपर्ययशून्यं ज्ञानमेव प्रमा, कस्मिन् मते ।

(क) बौद्धमते (ख) चार्वाकमते

(ग) जैनमते (घ) भाट्टमते

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत । **2×10=20**

(11) पुरुषार्थाः कति । तत्र अनित्याः के । 1+1=2

(12) वेदाङगानि कति । कानि च तानि । 1+1=2

(13) बृहदारण्यकं केन वेदेन सम्बद्धं । नाम च कथं सम्पन्नम् । 1+1=2

(14) मीमांसादर्शने कति प्रमाणानि । कानि च तानि । 1+1=2

(15) का नाम अहिंसा । किन्नाम अमानित्वम् । 1+1=2

(16) अभ्यासः कः । अपूर्वता का । 1+1=2

(17) आस्रवः कस्य दर्शनस्य पदार्थः भवति । अवशिष्टाः पदार्थाः के । 1+1=2

(18) विशिष्टाद्वैते कति तत्त्वानि अङ्गीक्रियन्ते । तत्त्वानि च कानि । 1+1=2

(19) न्यायदिशा अनुमानशरीरे कति अवयवाः । के च ते अवयवाः । 1+1=2

(20) शमः कः । दमः कः । 1+1=2

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(21) जैनदर्शनस्य आरम्बकालवृत्तान्तम् अलोचयत । अथवा जैनदर्शनस्य मध्यमावन्तरकाले अलोचयत ।

(22) अद्वैतिनां मते ब्रह्मस्वरूपं वर्णयत । अथवा अद्वैतिनां मायापदार्थं विचारयत ।

(23) शुद्धाद्वैतरीत्या मोक्षस्वरूपं पर्यालोचयत । अथवा विशिष्टाद्वैतमतनुसृत्य मोक्षोपायविचारं कुरुत ।

(24) निवृत्तस्य निवृत्तिः कथमिति विचारयत । प्राप्तस्य प्राप्तिः कथमिति समर्थयत ।

(25) अध्यारोपं वर्णयत । अथवा अपवादं वर्णयत ।

(26) प्रतिबिम्बवादं विचारयत । अवच्छेदवादं विचारयत ।

(27) मधूसूदनसरस्वतिदिशा विद्याविभागमालोचयत । अथवा कौटिल्याभिमतं विद्याविभागमालोचयत ।

(28) अद्वैतरीत्या ब्रह्मस्वरूपं किम् । शुद्धाद्वैतरीत्या ब्रह्मस्वरूपं किम् ।

(29) भामतीमतमाश्रित्य मायाविचारं कुरुत । अथवा विवरणमतदिशा मायाविचारं कुरुत ।

(30) नचिकेतसः श्रद्धां वर्णयत । अथवा किन्नाम मननमिति विचारयत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(31) मीमांसादर्शनोक्तं प्रत्याक्षादिप्रमाणविचारं आरचयत । अथवा मीमांसोक्तं विधिस्वरूपम् उपवर्णयत ।

(32) वेदान्तोक्तं जीवस्य स्वरूपं वर्णयत । अथवा सूक्ष्मशरीरं विचारयत ।

(33) एकजीववादे मोक्षस्य व्यवस्थां विवृणुत । अथवा अनेजीववादे मोक्षस्य व्यवस्थां प्रतिपादयत ।

(34) कर्मशारीरकमीमांसाभेदद्वयमुपवर्णयत । अथवा तन्त्रस्य विभाजनं कृत्वा वर्णयत ।

(35) वेदलक्षणं सङ्गृह्यालोचयत । अथवा न्यायदर्शनानुसारं प्रमाणविचारं कुरुत ।